Shri Raghunatha Temple MSS. Library,
JAMMU

No. ८२ / ध

Title शब्दकौस्तुभटीका भावप्रदीपः

Author कृष्णमित्रः

Extent ८० पत्र Age

Subject व्याकरण

© Dharmartha Trust J&K. Digitized by eGangotri

भावप्रदीपाभिधायाश्शब्दकौस्तुभव्याख्या

१२

79

© Dharmartha Trust J&K. Digitized by eGangotri

© Dharmartha Trust J&K. Digitized by eGangotri

१ ॐ श्रीगणेशाय नमः ॥ द्वन्द्वादेर्बहु जसः स्थाने सौ तस्य च लोपः इति शास्त्रद्वयस्यापारः
तेनैव लुकि पुनः पुनः प्रवृत्तिरिति गौरवं च पतञ्जलिराह लुविति सुपां सुलुगित्यनेन इती
पिलाद्युवायाह अथवा सेति समासान्तानित्यत्वं तस्यार्थमपीति तेन तदर्थत्वेन गौरवमिति
भावः षविधानमिति विकल्पेनान्तोदात्तार्थं षविधिः विनापि विकल्पवाधे विकल्पविधिवैयर्थ्ये
न सामर्थ्यादेव विकल्पसिद्धौ षविधिवैयर्थ्यमुक्तं तत्खण्डनयन्नाह सत्येवेति अन्यथाज्ञाप
नाभावे ऽन्तोदात्तविधिना मूर्धन्शब्दविषयकेन निरवकाशेन पक्षे प्रापितः सर्वपदप्रकृ
तिस्वरः एव हि स्वरं वाधेत सत्यामेवेति एवं च समासे - - पिद्धि मूर्धः इत्यादौ द्वित्रिभ्या
मिति वैकल्पिकान्तोदात्तत्व भवत्येव तथा च समासेन सत्वे विकल्पाभावे इष्टापत्तिर्वक्त

© Dharmartha Trust J&K. Digitized by eGangotri

मश्नावयेतिभावः स्यादेतत् समासांतानां समासावयवत्वं समासार्थोत्तरपदावयव
त्वं वा नाद्यः अवयवो यज्ञेनेऽवयवविशिष्टस्यैव समासविनमूर्धन् शब्दांतावयव
कसमासाभावेन विकल्पाप्राप्तेः नांत्यः अकारांतस्य प्रत्ययविशिष्टस्य मूर्धनशब्द
त्वाभावादिदं पदद्वयेप्यसंगतमिति आग्राहुः समासांतानां समासार्थालौकिकवि
ग्रहवाक्यावयवत्वेनादोषात् तथाहि समासांता इति सूत्रे समासपदं समासार्था
लौकिकविग्रहवाक्यपरं एवमव्ययीभावादि यदा न्यापि अंतशब्दस्य समावयववा
ची· एवं चालौकिकविग्रहके समाससंज्ञासमकालमे — समासांताः तथाच
द्विऔमूर्धन् औ इत्यवस्थायामलौकिके वाक्ये रूपः परस्तादेव समासांतः प्रवर्त्ते

© Dharmartha Trust J&K. Digitized by eGangotri

२

2

ते त्वयः पूर्वैवैत्तवाच्यार्थविरोधः न हित्तपूरहितं समासार्थेन तत्र हि शिष्टमेव न च वि।
शिष्टस्य तद्दन्तत्वाभावेन तत्त्वं तान्न हि तत् इति सिद्धान्तविरोधः तेषामर्थाभावेन परिष्
णीयदमिति तन्मूलभूतन्यायस्यात्र विषयाभावात् तत्र षप्रत्ययोत्पत्तिकालेपवत्त
त्पूर्वभागस्य समाससंज्ञाविरोधाभावात् समासान्तस्य च तद्वाकावयवत्वेन तद्ग्रह
णेन ग्रहणं हि त्रिभ्यां पादन्त्रिस्यस्य ताभ्यां परेयो मूर्धन्यशाद्बृत्तत्तद्गन्तायदकवद्ब्री
हिरित्यर्थः सप्तमी च षष्ठ्यर्थे एवं च विकल्पप्राप्तिर्निवीर्यैवेति उत्तरपदावयववत्वेत
षविशिष्टत्वोत्तरपदत्वान्न दोषः एवं तु उत्तरपदलक्षण — — नाभावादयं यत्नो।
भाष्यासंमतः केचित्तु विशिष्टावयवत्वेपि मूर्धन्यशास्त्रावयवत्वाभावेन मूर्धन्

© Dharmartha Trust J&K. Digitized by eGangotri

शब्दांतावककवङ्कब्रीहित्वं कथमिति चिंत्यमित्याहुः चिंतावीगत्व-- स्यपप्राग्वर्तिनोव
ङ्कब्रीहित्वेपिषष्ठस्यान्तरयदावयववत्वाभावात्स्वविशिष्टस्यमूर्धन्यशब्दत्वं ---- मितिव
यप्रतीभः पूर्वपक्षन्यायेनेति · ष्यङः तस्यसंप्रसारणंभवतिपुत्रपतिशब्दयोः परयोस्तत्पु
रुषसमासेइत्यर्थेकारीषगंध्यापतिकुलमित्यादौसंप्रसारणंका- तितिशंकायांतत्पु
त्रगततत्पुरुषपदेनोत्तरपदाद्वेयात्पुत्रपत्योरुत्तरपदविशेषणत्वेनतदंतविधिनापुत्रप
त्याद्यंतेउत्तरपदेपरेष्यङः तस्यसंप्रसारणंस्यादित्यर्थेनिष्पन्नेसतिकारीषगंध्यापरमपुत्रः
कारीषगंध्यापरमपतिरित्यादावतिप्रसंगइतिपूर्वपक्षः पुत्रपती- विशेष्याविति सि
द्धांतः तथाचमत्राद्धिमस्यविशेष्यत्वात्तदंतविधिरिवेहापियदाप्यादेशेगाद्विमपादाः

© Dharmartha Trust J&K. Digitized by eGangotri

३

3

द्दिभिः शास्त्रमस्ति ष्ठि तिभ्रान्त्योपस्थितयस्मात्तस्य यविधिस्तदादीत्यस्य विशेषणात्त
दंतविधौ पादाद्यंतं यद्यस्मात्तस्य यविधिस्तदादि तस्य पदादद्य इत्यर्थे हि दंतः पश्चेपत्या
दौ ददादेशः स्थलभ इत्यभिप्रायः केचित्तु नन्वयादाद्यंतस्य शाह्वांतरत्वेन तदंतर्गतपा
दस्यह्रस्यापि वैलक्षण्यमिति पदाद्यादेशो दुर्लभ इत्यरुचेराह सिद्धं त्ववयवेतीति तन्त्र
सर्वश्चैवमेवापत्तोन्तदंतविधिना सर्वश्चैव तदंते कार्यप्रवृत्त्यापत्तेः येन विधिरित्यस्यैवेय
र्थापत्तेश्च नन्वादिमस्यापातेन संबंधोस्तु आदितस्यादिमसंबंधोऽह एव चेत्तत्राह ।
सिद्धं त्विति अभिप्रायं यत्तदंतर्गतस्य नोतिवदत्रापिदंतशस्य ददादेश इति भावः अन्यथे
ति अन्यथात्वः आदिमस्य विशेष्यत्वात्तदंतविध्यभावे हस्तिशिरसो पत्यर्थेवा काकादि

© Dharmartha Trust J&K. Digitized by eGangotri

त्वादिति यत्तादोषो न ह्यनेन परे शिरसः शीर्षादेश इत्यर्थः केनापि शीर्ष इत्यनेन वार्त्तिकेन शी
र्षादेश उक्तः छन्दसि तदन्ताच्चाणि अत्रापि शीर्षादेशो न स्यादित्यगतिरित्यर्थः नच यदन्तविध्या
दिसूत्रेषु पादादेः षष्ठ्यन्तत्वेन यान्नपादानां निर्दिश्यमानपरिभाषयाऽभावेन तदन्तस्यादेशापत्ति
रिति वाच्यम् स्यान्यर्थाभिधानसमर्थस्यैवादेशत्वमिति नन्याद्यस्यैवादेश इति तात्पर्यात् सु
पठत्वाच्चेति ननु हि दंत इति बहुव्रीहौ वयोवाचकत्वाभावे दद्गादेशाभावे शसादौ यदन्तविधिरिति
दद्रादेशे प्रवृत्तस्यार्थं बहुव्रीहिग्रहणमावश्यकं किंच दन्तमूर्धेष्विति बहुत्वमशक्यं तिरन्तवंथकेऽ
प्रवृत्त्यापत्तेः नच तिरन्तवंथकेऽप्रवृत्ताविष्टापत्तिरेवेति वाच्यं पादयतेः क्विपि निष्पन्नपाच्छ
ब्दस्य बहुव्रीहिप्रविष्टपाच्छब्दस्य चोभयविधस्य ग्रहणस्येष्टत्वेन तत्साहचर्येण दन्तविध

© Dharmartha Trust J&K. Digitized by eGangotri

४

येत्वुभयग्रहणस्येष्टत्वात्‌· किंच बहुव्रीहिग्रहणसत्वासत्वयोरपि निरनुबंधकत्वादस्ये
वग्रहणं स्यादिति चिंत्यमेतदिति अत्राहुः लब्धवर्णत्वेन दच्छहस्य पूर्वनिपाते कर्मण्ये
याच्छहस्य तत्करणेन न नत्साहचर्येण वक्ष्यमाणप्रकृतिमात्रवृत्तिधर्मावच्छिन्नो
द्देश्यकविधिविधेयादेशकयाच्छहस्यग्रहणमिति तत्साहचर्यात्‌ सकथं चाक्रां·
तादिति साहचर्याद्व्वसमासांतरूपदद्दिशस्यैव ग्रहणान्न दोष इति अन्ये तु परसा
हचर्यस्य बलवत्त्वान्नर्थन्साहचर्येण विभक्त्यानिमित्तकददादेशस्यैव ग्रहणं दत्तसा
हचर्यात्तयादपि नाहशपवर्गत्त्वतेइति शसादिनिमित्तकस्य दत्तो बहिरंगत्वेन स्वरेक
र्मण्येऽसिद्धत्वाच्चेति बहुव्रीहिग्रहणं ज्ञापकमेवेत्याहुः केचित्तु बहुव्रीहौ योदत्‌ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

तदुक्तो यः समासस्तदुभयादन्तग्रहणस्यैव न्याय्यत्वादित्याहुः तच्चिंत्यं बहुव्रीहिग्रहणाभा
वे विचारसत्वात् स्फिगपूतेति अयादेर्तेनोदात्ताइति सूत्रार्थः तथाप्रेतेरिति प्रेतेः परं हृ १
श्ववाद्यंतोदात्तास्तत्पुरुषे इति तदर्थः तदकरणमिति ननु कार्यशाब्दबोधे स्ववाक्यार्थस्य
स्वघटकयदापरिनिष्ठितत्वेनार्थोपस्थापकत्वेन सूत्रोत्पत्तिकालेऽसंभवात्कथं स्व
निष्पाद्यप्रत्ययस्य स्वस्मिन् प्रवृत्तिः न च परिनिष्ठितत्वज्ञानस्य शाब्दबोधांगत्वान्न दोष
इति वाच्यं तज्ज्ञानस्याहेतुत्वेपि सूत्रस्यैवानिष्पन्नत्वेन स्वप्रत्ययविधायकांतराभावात्स्व
वाक्यार्थानिष्पत्तेरिति चेन्न असाधुत्वज्ञानस्य शाब्दबोधाप्रतिबंधकत्वेनार्थोपस्थितौ
वाक्यार्थे निष्पन्ने तद्घटकस्येव स्वस्मिन्नपि प्रवृत्तिसंभवात् नित्यशाब्दवादे साधुत्वारण

© Dharmartha Trust J&K. Digitized by eGangotri

५
5

स्येवोचितत्वेनविपरीतोच्चारणंज्ञापकमेवेतितात्पर्यम् अनित्यइति इयङ्. विभक्तेः
करणेन द्वियोदीर्घादितिनिर्देशोन्तज्ञापकोवोध्यः दिगिति दिगर्थस्त्वज्ञापकांतर
स्यासंदिग्धस्यसत्वेसंदिग्धज्ञापकोपवर्णनेमनुचितमिति नञ्समासपक्षेपद
विभागप्रदर्शकभाष्यविरोधोतआह अथवेति अस्मिन् समासपक्षेपक्षांतराभिप्राय
कंसमासाभियंहृद्योर्ह्रीतिभाष्यंतुसमुदायाभिप्रायम् आहुरित्यतियत्तुनाग्राह्यनिर्युक्ताभि
न्नरूपोपकाराभावादितितन्न उपयणइतिसूत्रेपवमीमांसकमर्यादयाहृषितत्वात् उपका
रानिरूक्तेरित्यादितत्रैवव्यामः शेजर्थमिति गुणानामभेदकत्वेनगुणांतरयुक्तसंग्रहादन
ण त्वेनसवर्णग्राहकत्वेनाकारार्थत्वाभावादित्यर्थः तेनत्रिमात्रचतुर्मात्रस्थानिनांक्लेक

© Dharmartha Trust J&K. Digitized by eGangotri

त्वमित्यादौ त्रिमात्रादयो न च संदेहार्थंतयेति अयं भावः ह्रस्वादिरादेशिति सूत्रमिकोगुणेतिव
त्पदोपस्थापकमिति सिद्धांतो वक्ष्यते तथा चादेच्चादेशापस्थितावादेचो भाव्यमानतया।
सवर्णग्रहणप्रसक्तेस्तत्परकरणमसंदेहार्थमेव न च ह्रस्वदीर्घस्येत्यादावत्र वादेशादेचा।
मुपस्थितौ सवर्णग्रहणं दुर्वारमिति वाच्यम् गुरोरादेः प्लुतेन फलस्य वक्तव्यतया तत्र स्व
तासिद्धत्वेन सिद्धौ फलस्य वक्तुमशक्यत्वात् वस्तुतस्तु हशलक्ष्याभावेनाप्राप्तिः यत्र
ग्राहकसूत्रेऽप्यशक्यसंज्ञेत्यत्र हलत्याशक्यसंज्ञायां स्वदर्णग्राहकत्वान्नपरकरणं व्यर्थं सदसं
देहार्थमिति तन्न तस्य प्रथमानत्वेन प्रकृतार्थालाभात् शास्त्राधिकारेणासमर्थस्यतत्वकल्पने
प्रमाणाभावात् उदात्तेदात इत्यादौ सवर्णग्रहणप्रसक्तेश्च ह्रादशास्त्रीउदान्नादत्तुदात्तस्य

© Dharmartha Trust J&K. Digitized by eGangotri

स्वरितइत्युत्तरत्रपाठोतिभाष्यसिद्धांतेपिलघुभूतोपायेनसवर्णग्रहणाप्रसक्ताव
नुष्टतेर्निष्फलत्वादित्याहुः यत्तुयदर्थंतत्तस्यागमिभिन्यायेनाह अस्तुवेतिइदंतइदि
तिस्वरितत्वाभावाद्यदित्वमित्यर्थः तितिप्रत्ययग्रहणंकर्तव्यमितिवार्तिकसत्वादि
त्वपक्षोनस्थितइत्यतआह वस्तुतस्त्विति नन्वसाधुशब्दोच्चारणेपाणिनेरश्रद्धेयता
पत्यात्तदुक्तशास्त्रस्यानुपादेयतापत्तिरतस्तदुक्तपदानांसाधुत्वंविचारयति नन्वेवं कुरि
तीतियत्तत्साधुत्वज्ञानस्यशाब्दबोधकारणत्वादिदमितितन्नास्सलावित्यत्रदूष्यते।
ननुशब्दानुशासनमिदंलौकिकवैदिकशब्दानांकेषांलौकिकानांवैदिकानांचेति
भाष्यकारोक्तेः तत्रवैदिकत्वंवेदप्रयुक्तत्वं लौकिकत्वंचलोकेर्थबोधनायप्रयुक्तशब्दत्वं

© Dharmartha Trust J&K. Digitized by eGangotri

उभयमपि नैव शब्देष्वाणिनि संकेतितत्वेनोभयथाभिन्नत्वात् भाष्यादिवदतः शास्त्राविषय
त्वात्कथं कुतत्वप्राप्तिरित्यत आह चतुष्टयीति अयं भावः शब्दार्थसंबंधानां सिद्धे शब्दार्थेति वा
र्त्तिकेन नित्यत्वोक्तेः पुरुषव्यापारात्प्रागबोधकस्य पुरुषव्यापारेण बोधकत्वायोगा
त्सर्वशब्दार्थसंबंधानां नित्यत्वमवश्यं वक्तव्यमित्येवं शब्दस्यापि नित्यमर्थबोधक
त्वात्संकेतस्याधिकस्यासत्त्वेन संज्ञात्वप्रसिद्धेः संज्ञाशब्दत्वात्संज्ञाशब्दस्य च जातिगु
णक्रियासंज्ञारूपचतुष्टयी शब्दानां प्रवृत्तिरिति भाष्योक्तेर्नानुशासनविषयत्वेवाथ
कमिति कुतत्वप्राप्तिर्डवीरेति ननु न संति यदृच्छाशब्दा इति पक्षे कथमत आह त्रयी
पक्षेपीति ननु रोचुत्वं न जातिरित्यत आह वैशेषिकेति नन्वपूर्वजातिस्वीकारेणे।

© Dharmartha Trust J&K. Digitized by eGangotri

7

एवमतमाह वस्तुतस्त्विति सिद्धांते वेदांतिमते तन्मतसंमते नन्वन्यूनानतिरिक्तध
र्मस्यैकस्याभावाद्व्यक्तीनामानंत्यात् शक्तीनामानंत्यमत आह व्यक्तिविशेषाश्चेति
नन्वेतासामानंत्यादानंत्यं न दद्वस्थमत आह अतद्भेदेनेति नन्वतद्भिन्नभेदानाम
पि प्रत्येकव्यक्तिवृत्तित्वादानंत्यादज्ञानादननुगमएवेत्यत आह स्वरूपसतेति घटं
गगाह्निकयायां काचिद्व्यक्तिमादाय तदभिन्नभेदत्वेनैकत्वादनुगमकत्वं तथा च तस्यैक
त्वाच्छक्तेरैक्यमिति नानंत्यमिति भावः तदुक्तं अनंत्यापि हि भावानामेकं कृत्वोपलक्षकं
शब्दः सुकरसंबंधो न च व्यभिचरिष्यतीति सुकरसंबंधः शक्याशक्तिग्रहः तस्यामिति वा
चकत्वेनेति शेषः जातित्वेन त्वतस्याः सर्वशक्यावृत्तसत्त्वेवेति भावः श्रोत्रमाह आद्येनेति

© Dharmartha Trust J&K. Digitized by eGangotri

स्पष्टा चेयं रीतिर्लिट्सूत्रे इति हृद्ये भाष्ये अनुकरणं समुदायबोधकः शब्दः समानानुपूर्वी
कत्वे सति शब्दार्थकशब्दान्तरत्वरूपस्यानुकरणत्वस्याद्येषु शब्देष्वभावात् जातिशब्दा इति
प्रकृते च सूत्रत्वे रूपजातिवाचकत्वमनुकार्ये शक्तिस्वीकारात्प्रातिपदिकत्वमेवमुक्तरूप
इदमपि भेदपक्षेणैव अभेदपक्षेऽर्थवत्त्वाभावात्प्रातिपदिकत्वेन विभक्त्यभावात् तत्पक्षे सा
दृश्यसंबंधेनोपस्थितिरनुकार्यस्य न तु शक्तिस्तत्रानुकरणशब्दस्य हृत्यनुपस्थितस्या
पि वृत्तिवैचित्र्याच्छाब्दबोधे मानं पण्डितानां नित्यशब्दपक्षे सादृश्येनोपस्थितेस्तस्मि
न् शब्दे न शक्तिकल्पनमित्यभेदपक्षः अनित्यशब्दवादे शक्तिकल्पनमिति भेदपक्षोऽपय
ति रित्याङ्गः प्रौढिवीजं तेवं रीत्या सर्वत्र संभवादादिरं त्येनेत्यस्य वैयर्थ्यम् एवं रीत्या न्यासा

© Dharmartha Trust J&K. Digitized by eGangotri

८
४

अयाभावेस्मादिंस्येनेत्यस्यवैयर्थ्यमिति केचित्तस्योत्पाअयतन्त्यविहारादिवद्दत्तामाषकारे
णाप्रत्याहारेषीहशीरीतिनिर्नास्तीतिबोधनान्नेदंयुक्तमित्याहुः नचाद्ययद्वइति संज्ञापद्वे
सर्वैःसर्वार्थवाचकाइतिपदेवृद्धिशब्दस्यानेकार्थत्वाददैचोपिवाच्यास्तथाचवैयर्थ्यमिति
भावः नियमार्थमितिहृदयदत्तस्तु वृद्धिशब्दाभावे- ततः अभेदोपचाराद्वृद्धियुक्तादैजवृत्तिः
अतएवसामानाधिकरण्यंलक्षणायेवसिद्धेद्वितीयपद्येपिनियमार्थम् वृद्धियुक्तदीर्घकारा
दीनांग्रहणंमाभूदितितावदेङ्गुणइत्यादावसम्भवाद्विरुद्धः संज्ञासूत्रत्वस्यावर्तमानवृद्धिश
ब्दघटितत्वात् द्वितीयपद्येतद्वृद्धित्वरूपज्ञातिबोधनार्थमेवसूत्रंकार्यमितितात्पर्यम्
नतुसंज्ञापदस्यसर्वसंमतस्याभावइतिस्वकल्पनमेतदत आह तदुक्तंकैयटेनेतिनिय

© Dharmartha Trust J&K. Digitized by eGangotri

त्वाद्वेति चोद्दितो यतः सर्वसंज्ञानां नित्यत्वमतो लौकिकत्वात् शास्त्रप्राप्तिरित्यन्वयः लोके
अर्थान्तरेऽप्रसिद्धानामपि संज्ञानां नित्यत्वबोधनाय सर्वपदं नन्वेवं वृशब्द आदिशब्देनेत्यतः
प्रोगैकारादिष्वसंकेतितेनात आह अनेकशक्तेरिति घटपदात्पटबोधनं घटपदस्य पटेऽपि
शक्तिः न च लक्षणा संबन्धाभावे लक्षणायोगात् असंबद्धेऽपि लक्षणायां शक्त्यविशेष इति
सर्वत्र शक्तिर्दुर्ज्ञाना तथा च सर्वशब्दार्थे शक्तेः सर्वे सर्वार्था इत्यत्र पर्यवसानमिति भावः नन्वेवं
सति वृद्धिशब्दस्याप्यादैच्त्वबोधकत्वसिद्धौ वृद्धिरादैजित्यादेर्वैयर्थ्यमत आह शक्त्यवच्छेदेति
अवच्छेदः नियमः शब्दार्थस्यानवच्छेदे इत्यादौ तथा दर्शनात् अथवाऽवच्छेदः संकोचः संज्ञि
नि संज्ञिविशेषे विनियोगः विश्रवस्त्वायनं अभिमतार्थमात्रबोधकत्वं अथवा विनियोगः

© Dharmartha Trust J&K. Digitized by eGangotri

विशेषेतिचमः अभिमतातिरिक्तार्थानरथ्युदासायचमः अर्थानामनंतत्वेप्याश्रय
स्यैकत्वाच्छक्तिरेकैव अर्थभेदाच्छब्दभेदप्रमाणाभावइतिमतेनेदंकेचित्त्वर्थनिष्ठाशक्ति
राश्रयतयाशब्दैतन्निरूपकतयेतिमतेऽनेकत्वंशक्तेरितिवदंति उपाधिभिन्नइति उपा
धीयमानोर्थोऽनेकइत्यर्थः उपाधिस्थितिनीउपाधीयमानलोहितादिसंबंधात्स्फटि
केयथाप्रतीयमानोभेदस्तथैवेत्यर्थः अर्थभेदाच्छब्दभेदइतिमतेनेदमित्यपिकेचित्
तद्धितेतितद्धितस्यबोधेत्यर्थः इत्यभ्युपगमेपीति वस्तुतस्तुवाचकत्वस्यगृहीतस्यैव
बोधजनकतयासर्वशब्दानामर्थानांचविशिष्टज्ञानाभावात्सामान्यतोज्ञानस्यबोधा
नुपपत्तिकृतयाचायमभ्युपगमोयोगिदृष्ट्या अम्यायइति अनेकेषुशक्तिकल्पनादितिभावः

© Dharmartha Trust J&K. Digitized by eGangotri

प्रसिद्धतरसंबंधस्य वाचकत्वनिर्वाहकस्य शक्तिरूपसंबंधस्य नन्वेवं गोणताकस्यापि
न स्यादत आह गोणेति सत्येवेति संकेतसत्वेक्कुचीमंचीत्यादीनां साधुत्वस्य पूर्वैरुक्तैरस्या॥
पिपिंडविशेषसंकेतितस्य साधुत्वमिति भावः नचक्कृतं कुर्यादिति गृहविरोधऽगृह्योलुं
प्तन प्रयुक्तप्रायश्चित्तस्य सत्वेऽपि साधुत्वाराणप्रयुक्तस्य तस्याभावादिति भावः अत एव सं
केताभावादेव प्रसिद्धे क्वचिदेव शक्तिरन्यत्र लक्षणेति पदेऽस्यार्थः ननु संज्ञासूत्राणां नि
यमार्थत्वस्यावश्यकत्वात्तमनत्वाह उक्तं चेति· व्यवहारायेति क्वचित्संज्ञिनि संज्ञिविशेषव्यव
हारं कर्तुं संज्ञायाः नियमः डित्थादिषु डित्थादिशब्देषु संबंधः शक्तिः नित्य एव युक्तष
व्यापारात्प्रागपि सिद्ध एव गवादिवत् गवादिशब्दानामिव सिद्धमेव बोधकत्वं युक्त

© Dharmartha Trust J&K. Digitized by eGangotri

१०

षष्ठ्यापारेण नियम्यते मद्रह्रदे डित्यशब्दे नायमेव पिंडो ऽयमवहृत्मा इतीत्यर्थः ह्रद्यादी
नामिति नीलोत्पलमित्यादौ विशेषणविशेष्यभावो यथा उत्कृष्टानिष्ठाह्रास्तथा ह्र
द्यादिशब्दानां शक्तिसंकोचरूपः संबंधोऽपि उत्कृष्टान्तर्गायण एव परं त्वर्थान्तरावोयना
यशास्त्रेणानूद्यत इति तात्पर्यम् प्रोद्याह वस्तुतस्त्विति अन्नपमष्टत्वरूपसाधुत्व
स्यानुशासनप्रवृत्तस्य षष्ठयोगित्वयातस्य च दिव्शब्दे सत्वेन कुत्वप्राप्तिरित्यर्थः तृतीयको
टौ प्रसिद्धेः कथमुभयवद्भिर्भाव इति प्रोक्तिः इष्टिरिति तथा च भाष्यकृत् नकृतीति देशेन
ह्वांदसकार्यप्रवृत्तिः स्त्रेष्विति अर्थः अप्रर्वा दे प्रोगोदवादाह यद्वा छंदः शब्द इति वा
र्तिक प्रत्याख्यानेनाह षष्ठीयुक्तइतीति ननु भयसंज्ञावत्वे संज्ञाद्वयप्रयुक्तकार्यद्वय।

© Dharmartha Trust J&K. Digitized by eGangotri

लाभेपिप्रतिबंधेनप्रमाणमतआह यद्वेति तथाकार्यविशेषविशिष्टगणपाठात्का
र्यविशेषलाभोनतुपरस्परप्रतिबंधइतितात्पर्यम् नतुकुत्वमित्यत्रसंज्ञात्वप्रत्येकका
रादिपंचकगतैकप्रवृत्तिनिमित्ताभावाज्ञावप्रत्ययोनुपपन्नोतआह कुशब्दस्येति तत्र
चसंज्ञाशब्दविषयेच मतभेदेति प्राचीननवीनमतभेदसत्वात्ऽप्रतिविशेषइतिप्रकृतेर
र्थपरत्वं धर्मत्वेनधर्मेभावप्रत्ययस्यशक्तिः कस्सचधर्मोवस्तुगम्याप्रकृतिजन्यबोधप्रका
रीभूतएवतेनककारादिपंचकवृत्तिर्धर्मइतिबोधः सचपंचकवृत्तिर्जातिविशेषः ककारा
राद्युपहितासमवायाशब्दस्वरूपंचेतिकेचित्तुशब्दस्वरूपंयदायद्धितसमवायएवंचक
कारादिपंचकवृत्तिर्जातिविशेषइतिबोधः यदातुप्रकृत्याव्यक्तिर्बुध्यतेतनशब्दस्वरूपंतदा

© Dharmartha Trust J&K. Digitized by eGangotri

॥

स एव प्रत्ययार्थः प्रकृत्यर्थः तदा जातिविशेषो भावप्रवृत्तिनिमित्तं । व्यक्तिविशेषो ऽ
यमर्थः कुशब्दत्वं ककारादिषु शक्तमेवं शक्तिग्रहे कुशब्दत्वेन ककारादीनां बोधः
तथा च प्रकारीभूतः कुशब्द एव त्वप्रत्ययार्थस्तदेवाह उक्तान्नितयेति यद्वा सर्वे भावा
इति वार्तिकमतमाह यद्वा प्रकृतिरिति अयमर्थः सर्वत्र भावप्रत्ययप्रकृतिः शब्द
रूपा जन्यबोधप्रकारत्वं संसर्गः तथा च गोत्वमित्यत्र गोशब्दजन्यबोधप्रकारो धर्मः
इत्यर्थः संज्ञाशब्देषु तु प्रकारीभूतधर्मान्तराप्रतीतेरर्थविशेषणतयोपस्थितसं
ज्ञाया एव भानं स्पष्टीकृतं चेदं कैयटेन कुशब्दः ककारादि पंचस्वाससमूहरूपश्यादि
ना तथा च कुत्वमित्यत्र कुशब्दजन्यबोधप्रकारः कुशब्द एवेति स एव त्वाद्यर्थः तदाह

© Dharmartha Trust J&K. Digitized by eGangotri

रिः संज्ञाशब्दस्वरूपं वेति केचित्तु सामान्यानीति गोत्वाद्यभिप्रायेण सज्ञावान्तैरिति तस्म
न्नेत्याद्यभिप्रायेण संज्ञेत्यादि संज्ञाशब्दाभिप्रायेण यद्वा शास्त्रांतरीयमतमुक्त्वा वैयाक
रणसिद्धांतमाह शब्दस्वरूपं चेति अत्र पदे संज्ञेत्यपि संज्ञाशब्दाभिप्रायेण प्राचीनरी।
त्या शब्दस्वरूपमित्येव सिद्धांतः शाब्दबोधे सर्वत्र शब्दप्रकारताभ्युपगमात् इति वदंति
न सोस्तीति व्याख्यावसरे स्पष्टीकृतमस्माभिः संज्ञाबोधकशब्दे शब्दः प्रवृत्तिनिमित्तं
संज्ञिनि तत्संबंधात् संज्ञिबोधकशब्दे च संज्ञिगतो धर्मः प्रवृत्तिनिमित्तं एवं च डित्थश
ब्दवदभिन्नाश्रादे च इति बोधः डित्थशब्दवत्वं च लोकसिद्धतादात्म्येनेत्याशयः घटो घ
ट इत्यादावभेदसंसर्गकबोधवारणायाह विरूपोपस्थितीति अभेदबोधे विरूपोप।

© Dharmartha Trust J&K. Digitized by eGangotri

स्थितेकारणत्वादितिभावः एतेन प्रागुक्तप्रकारकोपस्थापनेन अतएव लक्षणाभा
वादेव उद्भिदेति उद्भिच्छब्दो यौगिको वा रूढो वा आद्ये उद्भिनत्तीति व्युत्पत्त्या उद्भेद
कर्तृरूपपदार्थोपस्थित्या तस्य यागाभेदासंभवान्मत्वर्थलक्षणायां यत्किंचि
दुद्भेदकर्तृतरुगुल्मादिवता यागेनेत्यर्थः स्यात् नामधेयत्वेतु यागसमानाधि
करणंपनानुपपन्नं नत्र पूर्वपक्षः यौगिकमेवेदंपदं अपूर्वशक्तिकल्पनाऽभावेन
लाघवात् मत्वर्थलक्षणात्वगत्या सोढव्या सिद्धान्तस्तु उद्भिदितियागनामयोग
स्तु मत्वर्थलक्षणापत्या गौरवप्रसक्तेः अन्यथा पदप्रकारकोपस्थित्यनंगीकारे
लोपसंज्ञायां तज्ञाविना तज्ञावितयोः संज्ञित्वाल्लुगादिषु तज्ञावितस्यैव संज्ञित्वा।

© Dharmartha Trust J&K. Digitized by eGangotri

तुभयथापि शास्त्रेदृष्टत्वात्संदेहादाह किमादैतीति केचित्तक्तक्तवतू निष्ठेकित्यत्तनि
ष्ठापसर्गस्येतदर्थं नत्र्वसकेभावेक्त इति क्तशब्दभावितस्य निष्ठेति निष्ठाशब्दभावितस्य च
निष्ठासंज्ञेति शास्त्रे तन्मात्रपदस्य इति दर्शनादाह किमिति घ्वादिसंज्ञाविधावतद्भावित
योरित्यनाश्रयणाद्यपदस्य वान्तर्भावस्तस्येति भावइत्याहुः तद्भावितानामेवेति न
च तद्भावितानामेवेति पदः किन्न कृतः कल्पकाभावात् आहुरित्यागापदेशोऽविशेषपद
स्यैवसंभवात् ‐ पिटिघ्नमादिवत्तदाविनासंभवोपि नन्वु घ्वादिसंज्ञाविधौ शास्त्रनिष्पा
द्यानामेव संज्ञा दृष्टा निष्पातिम्नयेन केनापि शब्देनेत्यविशेषात्सर्वापि तथा देवं चानि
ष्पन्नानामेव संज्ञेति पदः अत्रपदेशात्सानिष्पाद्यानां नं ज्ञेतिरतीयपदस्य सत्वात् ह

© Dharmartha Trust J&K. Digitized by eGangotri

योरेवोज्झावनं न्स्नतताभावद्भ्रति एतत्पदलकल्पकं च शास्त्रे तथादर्शनमेवेति चेत् अत्रो
च्यते अत्र पदेद्वको गुणोनिसूत्रस्यासंभवद्भक्तिकतापत्तेः मालादीनां चैत्यस्य वैयर्थ्या
पत्तेश्च भाष्येतज्ज्ञापितपदेद्वकोगुणोनिदोषानुपन्यासस्तु दोषादिकप्रदर्शनादित्येकेन
चसर्वस्यस्तुपीतिस्तुपिपरे सर्वशाकृस्यादिकृदात्तइतिसूत्रार्थः आम्रमयमिति श्रुत्यत्रिपदे
अमितस्योर्दीर्घश्चेतिदीर्घशास्त्रेनविधानेपिवृद्धिशास्त्रेनभावितत्वाभावएवननुस्वमतप्र
च्युतिर्नदोषो – नन्वाह तथाचऋतइति नल्लोपइति · [illegible] गित्यर्थः आदैज्मात्रस्येतिव्याप्तिना
यादाहृत्यभावेनलाघवाच्चेतिभावः स्वर्यतइति यज्ञकेयटः पूर्वपदेनाद्देपाज्जुत्त
रपदेलब्धेउत्तरपदग्रहणमधिकारलब्धकं वृद्धिरूपोत्तरपदासंभवाद्वृद्धिमत्त्वप्रयते

© Dharmartha Trust J&K. Digitized by eGangotri

बृहिशब्दस्तु न गृह्यते अशब्दसंज्ञेति निषेधादिति: तन्न आव अवतीति ओ· क्विपि च
ज्वरत्वरेत्यूपधाचकारयोरूठि आद्गुणे – तीति बृहो रूपं अवतीत्यो रिति आङ्‌ रहितस्य
तु रूपं दुर्लभं सर्वस्य ओः सर्वौरित्यत्र बृहिरूपोत्तरपदसंभवात् तल्लक्षणायां वीजाभावा
त् न चैकादेशे व्यपवर्गाभावः न च स्थानिवद्भावः अपूर्वविधित्वात् इति वाच्यं नेन्द्रस्य पर
स्येति निषेधेन पूर्वोत्तरपदसंबंधिकार्यात्पूर्वमेकादेशाभावज्ञापनात् ततश्च सर्वशब्द
स्यान्ते नान्तोदात्तत्वे शेषनिघाते नोकारादीनामनुदात्तत्वे एकादेशस्य स्वरितो वानुदात्त इ
ति पाक्षिकः स्वरितः स्यात् न त्विष्टपत्त्याह उत्तरेति उत्तरपदस्येत्यधिकारीय बृहिरू
पोत्तरपदाभावात् सामर्थ्याद् बृहिमङ्गलत इति वोध्यं यत्त्वेवमपि सबृहाविति च क्तव्ये

© Dharmartha Trust J&K. Digitized by eGangotri

१५
14

उत्तरपदग्रहणं व्यर्थमिति केयटाशयः तन्न व्यपदेशिवद्भावस्याऽनुवर्तितत्वादित्याहुः
केचित्तु सर्वैरित्येतन्मात्रार्थत्वे सर्वमाविशन्त्येव वदेत् समासे नोत्तरपदाक्षेपे श्रोहरूपे
उत्तरपदे इत्यर्थेन सिद्धे उत्तरपदग्रहणमधिकारलक्षकमिति केयटाशयमाहुः अत्र
न्येतूत्तरपदस्य कार्यित्वपर्वनैतदस्येति ज्ञापकात्सर्वमेकादेशाभावः इह तु कार्यित्वाभा
वात्सर्वमेकादेशव्यपदेशाभावात्स्वराप्राप्त्या वृद्धिरूपोत्तरपदासंभवः परादिवद्भावे
नोत्तरपदत्वेपि सर्वशब्दात्पस्य स्वरभाजोऽभावाद्वृद्धिरूपोत्तरपदासंभव इति केयटाशय
माहुः सर्वपाञ्चालक इति तु सर्वार्धदिक्शब्देभ्यो जनपदस्येति तदन्तविधिः जनपदतद
वध्योश्चेति वुञ् न फल्लोपहितस्येति वृद्धेर्लुहितस्येत्यस्येकोपि निमित्तत्वमेवसंबंध इति ।

© Dharmartha Trust J&K. Digitized by eGangotri

वृद्धिनिमित्तं तद्धितः इत्यर्थः लाभे सिद्धे निमित्तशब्देन फलोपहितनिमित्तस्यैव ग्रहणमि
त्याशयः वृद्धेर्निमित्तं यस्मिन्निति व्यधिकरणबहुव्रीहिपरं भाष्यं तु यथाकथंचिदिष्टानु
रोधेन व्याख्येयं बहुवचनान्तसमासपरभाष्यं व्याचक्षे केचित्विति पूर्वमते वृद्धिशब्देन तं त्राद्या
म्रयणादाह केचित्विति त्यन्ये तथा च वृद्धीनामिति षष्ठ्यर्थः स्वरूपयोग्यत्वरूपं हेतुत्वं ।
तथा च निमित्तत्वपरिशेषात्फलोपहितं तत्त्व वृद्धिमात्रं — प्रतीत्यभिप्रायोक्तं या वृद्धी
ति निमित्तग्रहणमेव च व्याहृतिज्ञापनार्थं एतेन निमित्तग्रहणसामर्थ्याद्व्यधिकरणो
बहुव्रीहिः अन्यथा वृद्धिरूपतद्धितासंभवाद्वृद्धिनिमित्तग्रहणसिद्धौ किं तेनेति परा
स्तम् यत्तदं ढशब्दात्ग्रहणमस्या क्रीडायामित्यर्थे दाण्डा इत्यादौ वृद्धिरूपोयितद्धितः

© Dharmartha Trust J&K. Digitized by eGangotri

१५
15

संभवतीति तन्नञ्अविकार इति पर्युदासेन वृद्धिरूपतद्धितस्याग्रहणात् नहि विका
रार्थे वृद्धिरूपतद्धितसंभवोऽस्तीति ध्येयं यंवत्वंनिषेधो विशिष्टस्येति नस्यान्निवत्वं
एतेन एकादेशस्यानिटावपेक्षया पूर्वेणाप्रत्ययात्परस्यटायः ङुंवत्वनिषेधेक
र्मधेयं पंचमीसमासेन स्यान्निवत्वान्न वृद्धिरूपतद्धितसंभव इति परास्तम् एत
दस्वरसेनैव केपटेपदांतरमध्यवेति अस्मिन्नपि पदेनकार्त्स्न्ये प्रतिपत्तिकालिकं या
हं न प्रयोगसमवाधि तेन पारिषद्याभार्थे न दोषः वृद्धिशाहतेत्रं तद्व्याख्यानात् अ
त्र केचित् वैयाकरणीभार्य इत्येवरूपं वृद्धेर्निमित्तं यस्मिन्नित्यर्थाश्रयणेनादेज्मा
त्रस्येति पदेनावज्ञार्थे भाष्ये दोषवारणात् तथा हि वृद्धेर्निमित्तेणाकारादि यस्मिस्ता

© Dharmartha Trust J&K. Digitized by eGangotri

दृष्टान्तद्धितग्रहणं न च तावद्वार्येपि व्यपदेशिवद्भावेन निमित्तमेस्तीति वाच्यं निमित्त
ग्रहणसामर्थ्याद्व्यपदेशिवद्भावाप्रवृत्तेः अन्यथा निमित्तत्वार्थं षष्ठ्यैव सिद्धे किं तेन एवं च
शाब्दव्यापाराश्रयणे न मानं अधिकारप्रस्य तद्धिते इत्यस्यानुगमे मण्डूकानुवृत्तौ च न मानमि
त्यैचां प्रति निमित्तत्वमस्त्येव ऐजंशे वृद्धिपदसंबंधेन वृद्धिशब्देन विधानमप्यस्ति वृद्धिप
दसंबंधादेव दाक्षिकीभार्यो देविकाशिंशपेत्यादावैचत्वनिषेधः अन्यथा न स्यात् भाष्या
देविकाशिंशपेत्यस्य प्रथमाध्यायैकदेशेन एषामाकारस्य वृद्धिसंज्ञां विधाय तद्धितेष्वचा
मादेरित्यनेन तद्विधानमिति पक्षान्तरस्योक्ततया तदेकफलत्वाय तत्र वृद्धिपदसंबंध।
सत्त्वात् सूत्रभेददूषणमात्रेण च न दूषितमित्यन्यत् एवं च पेज्विधायके ऐजंशे पित

© Dharmartha Trust J&K. Digitized by eGangotri

१६
16

त्तमंवं यद् इत्यपर्यायात्तं एवं च वैयाकरणीभार्य इत्येव अत एव नेय्वाभ्यामिति सूत्रे यद्यपि

नित्यत्वादैचि वृद्धिस्तयोरेव स्यादिति निषेधवैयर्थ्यमाशंक्य विषयार्थं दाध्यशिवरि

ति समाहितं तत्पक्षे पुंवत्त्वनिषेधलाभात् यद्यप्यपवादो वृद्धेरयमिति वृद्ध्याप्राप्त्यैव

निषेधवैयर्थ्यं वक्तुमुचितं तथापि विषयभेदान्नापवादत्वं असंभवे एवापवादत्व

मिति वार्त्तिकमते एवमुक्तं किं चात्र पुंवत्त्वे इष्टे निषेधवारणाय प्राप्तव्यापारस्यावश्यक

त्वेन वृद्धिरादैच् सूत्रेणावज्ञार्थे दोषवारणाय व्यधिकरणबहुव्रीहि पर्यन्तं भाष्यकृतो याव

न्नं विफलं स्यात् मद्रकरी स्यात् वृद्धिपदसंबंधेन पुंवत्त्वनिषेधप्राप्त्या तादृशाविनानामेव संज्ञे

ति पक्षे भाष्येऽस्यानुपन्यास इति वदंति अनर्थकमित्यादि अनर्थकं व्याकरणे प्रयोगप

© Dharmartha Trust J&K. Digitized by eGangotri

र्थबोधकं साध्वनुशासनं वृद्धिशब्दाशब्दयोः साधुत्वबोधकं · प्रयोगनियमार्थं वृद्धिश
ब्दात्परत्रैवादैचां प्रयोगार्थम् आदेशार्थं वृद्धिशब्दस्यादैच आदेशा इत्यर्थकं आगमार्थं।
वृद्धिशब्दस्यादैच आगमा इत्यर्थकं विशेषणविशेष्यभावार्थं समानविभक्तिकत्वात् न
न्वेतेषामशानुपपन्नोसेपि सूत्रं किमर्थकमत आह संज्ञासंज्ञीति यच्छब्दयोगः तरति ब्र
ह्महत्यां योऽश्वमेधेन यजते इति · आध्यमज्ञातउद्गोग्नीनादधीत इत्यादौ तच्छब्दः यो ब्राह्म।
णायावगुरेत्तं शतेन यातयात् इति एवकारः हन्यादेवा विचारयन्नित्यादिमंगलार्थमिति
मंगलादीनि मंगलमध्यानि मंगलान्तानि च शास्त्राणि प्रथंते वीरपुरुषाण्यायुष्म।
त्पुरुषकाणि भवन्तीत्यत्रैव भाष्योक्तेः वक्ष्यमाणैः आद्गुणादिभिः न व्यभिचारः प्रा

© Dharmartha Trust J&K. Digitized by eGangotri

१८
17

प्यमस्य एतत्पदाव्यवहितमेतत्पदमित्यामतिज्ञानमेवचानुपूर्वीज्ञानमितिनातिरिक्तं
किंचित्कल्प्यमित्याह पदानुपूर्वीति कथोच्छेदइतिवादिनोनिग्रहोनस्यात्कथायामुच्छे
दइत्यर्थः केचित्वासन्नमनासन्नमितिव्यवहारोनस्यादित्यर्थंवदंति आहृतिस्रेवत्तिवृद्धिश
ह्नस्यास्तिचिद्वृद्धिरित्यादावाहृतेः सएव संज्ञेत्यर्थः यदानुपूर्वीभंगेनात्रपदेगौरवादाह।
यद्वेति योऽयमिति अत्रपदेवृद्धिशब्देनादैचोर्वोद्धव्या इत्यर्थः इतिनानुपूर्वीभंगइत्यर्थः
अन्येदंतत्वं सर्वशब्दानांसर्वार्थवाचकत्वेपिवाचकत्वस्यगृहीतस्यैववोधजनकतयासं
ज्ञास्त्रशाणामज्ञातशक्तिज्ञापकतयाविधित्वमेवनियमार्थत्वं किंच सर्वसर्वार्थाइत्यभ्युप
गमोयोगिदृष्टानास्मदादिदृष्टा सर्वशब्दानामर्थानांचविशिष्यज्ञानाभावात् सामान्य

© Dharmartha Trust J&K. Digitized by eGangotri

तत्तथाज्ञानं च न बोधोपयोगि शास्त्रं तत्समुदायोद्देशेनैव प्रवृत्तं तेषामनुपयोगाच्छास्त्रस
संकेतग्राहकशास्त्रकरणं च स्वेच्छयैव तेषां यदृच्छाशब्दत्वेन व्यवहारः स्वेच्छया संज्ञाः त्रि
त्यंत इति च संज्ञासूत्रेऽपदेशात्प्राकृतत्र संज्ञात्वाग्रहेण तासामनित्यत्वव्यवहारः अतएव
तत्तत्संज्ञाकरणज्ञानरूपप्रकरणादन्यार्थाग्रहरूपो नियमः कृत्रिमाकृत्रिमन्यायमूलतयो
क्तः संख्यासंज्ञासूत्रे भाष्ये आर्थिकमेवानुनियममादाय संज्ञासूत्रेषु नियमत्वव्यवहारो व्य
वहारायनियम इत्यादिना कृतः वाचकता बोधकत्वेपि नदंत्वस्यादकत्वान्न शब्दार्थसंबंधनित्य
त्वभंगः शिष्टप्रयुक्तत्वाच्चासां साधुत्वं वृद्धिशब्दोत्र पदपरः अर्थपरत्वाभावात् आदैच्त्व
संज्ञासूत्रात्प्रागसंकेतितः आदैचो वृद्धिपदाभिन्ना इति वाक्यार्थः पदपदार्थयोस्तादात्म्यांगी

© Dharmartha Trust J&K. Digitized by eGangotri

कारात् रागेति द्वन्द्वं नामसमानभंगः पिनाकिन इत्यादौ तयोरभेदप्रतीतिरनुभवसिद्ध
त्वादिति बोध्यं कार्यकालेति अत्र पक्षे मृजेर्वृद्धिरित्यस्य मृजेर्वृद्धिपदाभिन्ना आदैचो भव
तीत्यर्थः दिगिति दिगर्थ हल्वादैचूशब्दोपस्थितावपि वृद्धिपदात्पूर्वमेवेति कथमिति चिंत्य
पतेन व्यवहाराय नियम इत्यनेन कार्यकालपक्षेणवा स्वरूपमिति स्वरूपस्य शब्दः संज्ञे
त्यर्थः आदिरंत्येनेति अत्र यद्यपि संज्ञा न कृतः किंत्वादिदास्तथापि शब्दाध्याहारवादे तादृ
श शब्देन तस्यैवानुपूर्वीकल्पनमिति भावः अर्थाध्याहारे तु चिंत्यमत्रानुपूर्वीकल्पनमिति
अर्थाध्याहारेपि शब्दरूपस्यार्थस्य सत्वात् तस्य च युक्तानुपूर्वीति चिंत्यमिदं यत्विति यत्राष्ट
रूपदं तत्रैकालि तिङ्पति ष्टत इत्यर्थे प्राप्यसंप्रयुक्तमित्याशयः संज्ञायाहीति संज्ञाच विद्य

© Dharmartha Trust J&K. Digitized by eGangotri

मानस्य संभवति अविद्यमानस्य संज्ञायाः कर्तुमशक्यत्वात् संज्ञयोपस्थितेरभावेन संज्ञया
विधानमनुपपन्नमिति भावः ननु भाविसंज्ञाविधानसामर्थ्याद्विधिषु भाविसंज्ञाविज्ञानान्ने
तरेतराश्रयइत्याशंकां निरस्यति नच मालादाविति मालादौ संज्ञाशास्त्रस्य चारितार्थ्याज्ञा।
विसंज्ञाविधाने मानाभाव इति भावः एवं च विधौ दोषो नानुवाद इति भावः मतो वृद्ध्यादि ष्वि
ति सतो ह्यनन्तविद्यमानस्य संज्ञाभावात् संज्ञाभवनात् संज्ञयाव्यवहारादिति यावत्।
तदाश्रये संज्ञाश्राश्रयो यस्मिन् संज्ञयासंज्ञिविधायके मृजेर्वृद्धिरिति शास्त्रे वृद्ध्यादि
ष्वृद्ध्यादिपदेष्वितरेतराश्रयत्वात् संज्ञाशास्त्रविधिशास्त्रयोः परस्पराश्रयत्वात्।
संज्ञाशास्त्रवाक्यार्थस्य विधिवाक्यार्थबोधेकारणत्वात् विधिवाक्यार्थनिष्पाद्यस्य च संज्ञा

© Dharmartha Trust J&K. Digitized by eGangotri

१९
19

करणेन संज्ञाशास्त्रस्य विधिवाक्यार्थापेक्षत्वात् । अप्रसिद्धः द्वयोर्वा कार्यबोधानुपप
त्तिरित्यर्थः यद्यप्यनुवादे सिद्धसंज्ञाविधानेन संज्ञाशास्त्रवाक्यार्थबोधो नानुपपन्नस्त
थापि विध्युपयोगिवाक्यार्थानिष्पत्तेर्विधिवाक्यार्थानुपपत्तिरेवेत्यर्थः सिद्धं त्वि
ति नित्यशब्देषु सतामादैचां संज्ञा क्रियते न संज्ञया आदैचो भाव्यन्ते ननु मृजेर्वृद्धि ।
रित्यनेनापूर्वा न विधीयते तर्हि शास्त्रमनर्थकं स्यादिति चेत् धातुपाठे मृजावुपदि
ष्टे मार्ष्टीत्यादीनामसाधुत्वबुद्धिः प्राप्नोतीति तेषां साधुत्वान्वाख्यानाय शास्त्रमिति भा
वः यद्यपि साक्षान्मार्ष्टीत्यादेः साधुत्वं मृजेर्वृद्धिरित्यनेन न बोध्यते तथाप्याकारः साधु
र्बोध्य इति प्रणाड्या मार्ष्टीत्यादेः साधुत्वबोधनमिति शास्त्रविदां यथाः नित्यशब्दपक्षे स ।

© Dharmartha Trust J&K. Digitized by eGangotri

मायायकार्याः शङ्काऽऽइत्यिपदेसमाधिमाह अथेति आकारगणबलेनैव मूर्त्तेणैव स्फुरि
त्तेन स्फुरत्तिमिच्छेन्न नद्दातिः नान्योन्याश्रयः आकारे स्फुरते इति प्रत्यक्षे शक्तिग्रहात् इति
भावः उपरोदृश्यमानेन विगोपदशक्तिग्रहः सच सकलव्यक्तिषु नद्यक्षेवानाद्यः व्यक्ती
नामानन्त्यात्सर्वासामसंनिकृष्टत्वात्सर्वासु शक्तिग्रहासंभवात् नान्त्यः शक्तिग्रहाविषयव्य
क्त्यंतरबोधाव्यभिचारात्तदनुपस्थितेः नहि स्वविषयशक्तिग्रहस्य हेतुत्वात् असंनिकृष्टव्यक्तीनां
शक्तिग्रहकालेऽनुपस्थितत्वेन तासु शक्तिग्रहासंभवात् तस्मात्सन्निकृष्टव्यक्तिवृत्तिध
र्मवत्वसंबंधेन सकलव्यक्तीनामपि सन्निकृष्टत्वात्सर्वास्वेव शक्तिग्रहः एवं च घटादि
पदशक्तिग्रहकाले आकारवृत्त्यात्वचत्वसंबंधेन सकलाकारेषु शक्तिग्रहान्नान्योन्या।

© Dharmartha Trust J&K. Digitized by eGangotri

२०
20

अयः असत्यपक्षेयेनरूपभाविच्छिन्नेविषयतायाइवज्ञातिसंबंधस्वीकारात् इति प्राचः वस्तु
तस्तु शक्तिग्रहकाले शक्तिग्रहविषयव्यक्तिवृत्तिधर्मज्ञानसत्वात्तद्धर्मवत्येव शक्तिग्रहः तद्ध
र्मवत्वं च सर्वासामिति सर्वत्र शक्तिग्रहोऽस्तु इति नानंत्यव्यभिचारौ अत्र पक्षे गौरवाल्लघूपा
यमाह आत्वज्ञात्ताविति अत्र पक्षे ज्ञातो शक्तिग्रहः आकारो वृद्धिपदशक्य इत्यनुभवकाले
नागृहीतविशेषणन्यायेनात्वज्ञानसत्वादात्वेपव शक्तिग्रहः लाघवात् न चानंत्यव्यभिचा
रौ तज्ज्ञातो शक्तिग्रहस्तज्ज्ञानाश्रयव्यक्तिबोधे कारणमित्यभ्युपगमात् इति भावः अत्रापि पक्षे
कार्यकारणभावे व्यक्तिनिवेशे गौरवादाह शक्यत्वमेवेति तद्धर्मप्रकारकोपस्थितौ तद्धर्मप्रका
रकशक्तिग्रहः कारणं तद्धर्मप्रकारकशाब्दबोधे तद्धर्मप्रकारकोपस्थितिर्हेतुरिति नापूर्वव्य

© Dharmartha Trust J&K. Digitized by eGangotri

क्तिबोधेक्यानंत्यव्यभिचाराविति भावः अन्यथाप्रकारद्वयोक्तस्यानंगीकारे नग्रहेतन्नोप
तिष्ठेत अनन्वेवकार्यशब्दत्वस्वीकारादेव लडादिविधाविति तेषांप्रयोगाभमवायित्वात्सा
धुत्वबोधनेप्रयोजनाभावादिति भावः सर्वत्रेति लक्षणया -- दिः साधुर्भवतीत्येवमित्यर्थः
विधेयवाचिपदानां लक्षणाबोध्या वैयाकरणानयेवाक्येशक्तिसत्वेननतस्यैच लक्षणेति सूत्र
एवलक्षणेतितत्वं नतुसंप्रसारणाद्येव विकल्प्यतइति भाष्यात्संप्रसारणादिमात्रं विधीय
तइति प्रतीयतेऽतआह केवलेति यणादिमात्रविधानेपीत्यर्थः अन्तार्थापत्ती तिसाधुत्व
स्याविधानेयणादिविधानं वैयर्थ्यशंकयानुपपद्यमानंसाधुत्वकल्पकमिति भावः अ
तस्यार्थस्यापत्तिरनुपपद्यमानत्वंकल्प्यवाक्यादिति अर्थापत्त्यामीनादेवदत्तो दिवानभुं

२१
21

कृष्णस्य च रात्रिभोजनं वदितिभावः अनुमानमेवेदमितिकारणादाः ननु वृद्धयभिन्नाश्चादेच इति वाक्यार्थे समुदायस्य संज्ञा स्यादत आह इह चेति प्रत्येकमिति समुदायस्याप्रयोगात्स मवायित्वात्प्रयोगार्थत्वाच्च संज्ञायाः प्रत्येकमेव प्रवृत्तिरिति भावः न्यायसिद्धेर्थे लिंगमप्या ह मालादीनां चेति नहि प्रत्येयवृद्धमकर्कादीनामिति निषेधबाधनार्थं समुदायसंज्ञायां त्ववृद्धत्वादेव सिद्धौ किमनेनेत्यर्थः सर्वस्याप्यवृद्धत्वादवृद्धमित्यस्यावैयर्थ्यं च वृद्धिर्य स्येत्यस्यासंभवदुक्तिकतापत्तिश्च नच नामधेयेवा नामधेयस्येति वृद्धत्वादाष्कदानार्थमि ति वाच्यं अभिव्यक्तपदार्थायेइति न्यायेनाप्रवृत्तेः न्यायमप्याह व्रात्यानाइति अन्यथै कस्यानुपाहृढनानापदज्ञानेनैकस्मृतिविषययोरादैवोस्तत्रेणप्रत्येकं संज्ञिसंबंधक

ल्पनापेक्षया संभूयोपस्थितिज्ञासत्वेन समुदितस्यैव संज्ञा स्यान्न प्रत्येकमिति केचित्
द्वंद्वनिर्देशादित्यपरे प्रत्येकवाक्यपरिसमाप्तिश्च वाक्यार्थक्रियायाः वाक्योपात्तेषु एकैक
स्मिन् पृथक् पृथक् प्रवृत्तिः तदुक्तं अन्नादनादिरूपा च सर्वेत्तभिफलंभुजिम् प्रत्येकं प्र
तिपद्यं तेन तत्तन्नाद्यक्रियामिवेति प्रधानभूतस्येति प्राधान्यं चार्थिन अराजानः इति वाक्यशेषेण
ज्ञितत्वमत्वेनोद्देश्यत्वाद्बोध्यम् अतएव प्रत्येकं वाक्यसमाप्तेरेव सहग्रहणमिति सहितेऽर्थ
र्थेकमित्यर्थः किमुभे इति प्रत्येकं संज्ञायाः द्वेइत्येव सिद्धेः संयुज्यंते वर्णा यत्रेति संयोगः स
मंताद्स्यंते पदानि यत्रेति समासः इत्यन्वर्थत्वं यत्नः अतएव महासंज्ञया सिद्धेऽर्थे।
त्वादेव पेऽजर्थमिति नान्यरत्वाद्दीर्घयोरेव संज्ञेति गंगोदकमित्यादौ त्रिमात्रचतुर्मात्राणां

© Dharmartha Trust J&K. Digitized by eGangotri

२२

स्थाने त्रिमात्रचतुर्मात्रयोरावृत्त्यर्थमित्यर्थः उच्चारणार्थमिति अ।इ।उदित्यत्रेऽशब्दः सं
ज्ञेत्यनुवर्तते शब्दस्य संज्ञायां विधेयायामणः सवर्णान्न गृह्णातीति गुणवृद्धिसंज्ञा
यां न सवर्णग्रहणं तपरकरणं तु स्पष्टार्थमीदूदेदिति वत् असंदेहार्थमिति किमादे
चोत्र निर्दिष्टा अथवा ऐचावेवेति संदेहे मालादीनां चेति ज्ञापकाश्रयणोक्तेः शा इति सं
देहाभावायेत्यर्थः अभिप्रेत्येति एवं च तपरत्वं गुणानां तु उक्तसंग्रहार्थमिति वार्तिक
मतं स्थितमिति भाष्यमते स्पष्टार्थं तपरत्वमित्यर्थः नान्तरीयकत्वेति अवश्यं कस्मिं
श्चिदुच्चारणीये पदे उच्चारणं तेनेत्यर्थः करिष्यत इति तथा चोपदेशमात्रे तु दान्तत्वाभा
वान्न निषेध इति व्यर्थमेकाच्ग्रहणमित्यर्थः चतसरीति चतस्रः पश्येत्यत्र चतु

© Dharmartha Trust J&K. Digitized by eGangotri

रः शासीत्यंत्तोदात्तत्वंमाभूदित्याद्युदात्तनिघात्तनंक्रियते आद्युदात्तस्यचस्यात्यनुरूप
त्वाद्यलाभावादविवक्षास्यादितिचत्वरः शासीत्यस्यवाधकोनिपात्तनस्वरेणनस्यादिति
भाष्यमनुपपन्नमित्यर्थः चत्वरः शासीति चत्वरेंनउदात्तः शासीतिसूत्रार्थः भः सं।
ख्येति तांत्तारंनाचसंख्याआद्युदात्तेत्यर्थः नित्स्वरेणत्रिन्यादिर्नित्यमित्यनेनत्रिदं
तस्यनिंदंतस्यादिरुदात्तई तिसूत्रार्थः उच्चारणोपपत्तौ उच्चारणेनउपपत्ताविति
विग्रहः स्यात्यनुरूपमेवोच्चारणमितियलाभावइतिभावः विवक्षार्थमितिय।
लाद्विवक्षार्थमित्युदात्तग्रहणंव्यर्थमितिभावः ज्ञापयेदिति शाब्दाधिक्यादर्था
धिक्यमितिभावः हेत्ताविति विवक्षाकारणसत्वाउदात्तग्रहणवेयर्थ्यमेवापत्तति

© Dharmartha Trust J&K. Digitized by eGangotri

मूलेति मूलमनुदात्तग्रहणं तस्य शैथिल्यं स्वसामर्थ्यकानुपपादकत्वं तस्मात् ननु निपा
तनेनामान्याहृशेप्रयोगेप्राप्तेऽन्याहृशप्रयोगाकरणं तथा च हूंतेर्थानुस्वरेणंतोदा
त्तत्वादंतोदात्तेवयादेशेऽनुच्चारणीये आद्युदात्तोच्चारणं यत्न इति विवक्षा स्यादेवेति किम
नुपपन्नं त्रिचतुरोरिति सूत्रेपि तिस्र चतस्र इति हूं हू हूं हप्रयुक्तेंतोदात्ते कर्तव्ये आद्यु
दात्तोच्चारणं विवक्षाहेतुरिति निपातनस्वरेणांतोदात्तत्वस्य बाधक इति युक्तमेव बाष्ट
भाष्यं परमास्यिशाहूादावंतोदात्त गुणकस्यापि स्यादिति तेन विवक्षाहेतुयत्नाभावान्न
स्यादेव विवक्षेत्यनुदात्तग्रहणं ज्ञापकमेवेति हृष्येवैवं समर्थनमिति चेत् शिष्यबुद्धिवु
त्पादनार्थमेवैतदित्याशयेन पदांतरमाह यद्वेति गुणाभिन्नानां गुणेनानुनासिकत्वेन

© Dharmartha Trust J&K. Digitized by eGangotri

भिन्नानां अत एव विधेयविषये भेदकपदानामग्रहणादेव अप्रत्यय इत्यनेन विधेयविषये
भेदकपदस्यैव बोधनादिति भावः एतेनाप्रत्यय इति सत्वात्कथं भिन्नदिग्यायास्तं ज्ञाप
नार्थमिति संयन्तत्यादेः परसवर्णेन निष्पन्नस्य द्वित्वे ञकारत्रयश्रवणार्थं हि न तत्क्रिय
ते लोपस्यानित्यत्वेतु लोदेनापहारात्तद्द्वित्वाद्वित्वयोः विशेषानद्धार्थं सहलोपवैकल्पिकत्वं
ज्ञापयतीत्यर्थः यावं त्रैतिगुणाभेदकत्वेऽग्रहणं मर्थमेवस्यादिति भावः अत एव स्व
सार्थक्योपपादकसवर्णार्थज्ञापकत्वादेव आत्वनित्यत्वेव्याचर्याप्रसिद्धिः कृतात्वस्य षा
ट्त्वाभावे अष्टाभिरित्यत्र सावकाशस्याष्टन इत्यस्याष्टाभिरित्यत्र षट्त्वेन ड्वल्लुपोत्र
मित्यनेन परत्वादष्टन इत्यस्य बाधे दीर्घग्रहणं वैयर्थ्यमेव कृतात्वे षट्त्वेन षट्स्वरस्य

© Dharmartha Trust J&K. Digitized by eGangotri

अष्टाभिरित्यत्रापि प्राप्त्याऽष्टन इत्यस्य निरवकाशत्वेनाष्टाभिरित्यत्रापि प्रवृत्त्यापत्तेरिति
तत्राप्रवृत्त्यर्थं दीर्घग्रहणं न च शसि चारितार्थ्यं अष्टनः शसः स्थानोदात्तत्वेन आत्वनिष्प
न्नाकारेणैकादेशस्यैकादेश उदात्तेनोदात्त इत्युदात्तत्वे विभक्त्येकादेशस्याप्येकादेश उदात्तेने
त्युदात्तत्वे सिद्धेऽस्यानुपयोगात् ननु प्रियाष्टः प्रियाष्टन्यादौ विभक्तेरुदात्तत्ववारणाय दी
र्घग्रहणमावश्यकमिति कथं ज्ञापकमिति चेत् अत्राहुः अष्टनो दीर्घादित्यत्रान्तोदात्ता
दित्यनुवर्त्यान्तोदात्तादष्टनः परेति व्याख्यानादष्टाभिरित्यादौ विभक्तेरुदात्तत्वं सिद्धमिति चू
र्णादित्वेनाष्टनोऽन्तोदात्तत्वात् प्रियाष्ट इत्यादि बहुव्रीहौ तु पूर्वपदप्रकृतिस्वराभ्युपगमेना
ष्टनोऽन्तोदात्तत्वाभावाद्विभक्त्युदात्तत्वेन प्रवर्तत इति दीर्घग्रहणं ज्ञापकमेवेति अत एव

© Dharmartha Trust J&K. Digitized by eGangotri

उभयज्ञापकत्वादेव अधिकारेणेति एतदधिकारबहिर्भूतानामसंहितायां प्रवृत्त्य
र्थमिदं संहितायाः सर्वत्र नित्यत्वे तु व्यर्थमेवैतत् असंहितायां कालव्यवायादेवाप्रवृत्तौ
व्यर्थं स्यादेतदधिकारबहिर्भूतानां कालव्यवाये प्रवृत्तिं ज्ञापयति न्यवग्रहे आनङादि सि
ध्यति केचित्तु तस्मिन्निति सूत्रेण सिद्धे संहिताधिकारः संहितानित्यत्वज्ञापनार्थः अग्ना
विष्णू इत्यग्नाविष्णू इत्यवग्रहे आनङर्थम् अन्यथावग्रहे व्यवधानान्न स्यादित्याहुः पदा
न्तरेति अभेकाश इति पदान्तरेत्यर्थः विशिष्टानामिति विधिवाक्ये पदसंज्ञासंबन्धार्थं संज्ञा
विशिष्टानां विधिरित्यर्थः अन्यथा वाक्यान्तरेण संज्ञायामविधानात् संज्ञाविशिष्टस्या
प्रसिद्धे विशिष्टविधिरनुपपन्नः स्यात् यथेति तत्राख्यन्यायाभावाद्योगसामानाधिकर

© Dharmartha Trust J&K. Digitized by eGangotri

एपान्नामधेयत्वावगमसमकालमेवविशिष्टविधिः तथा सृजेर्वृद्धिरित्यत्रैवसंज्ञासंज्ञि
भावावगमो न तु संज्ञाविधायकं वाक्यांतरं पदोपस्थापकमिति यत्र वृद्धिशब्दस्तत्रादेचु
उपतिष्ठंत इति वाक्यार्थः अस्मिन्नपि पक्षे वृद्धिशब्दस्य प्राथम्यमेव युक्तं शब्दोपस्थितेः
प्राक् बोधागतत्वात् प्रदेशेषु तु आदैचु पदकल्पनयैव बोधः कल्प्यमानपदस्यैवोपस्थाप
कसमानविभक्तिकत्वं अत एवोत्तरपदवृद्धाविव्यत्र न दोषः अन्ये तु कार्यकालपक्षे
सृजेर्वृद्धिरित्यादौ वृद्धिपदार्थजिज्ञासायां वृद्धिरादैजित्युपस्थित्यानंतर्यबोधरूपेश
क्तिग्रहे हृते विधिवाक्यार्थबोधः अत एव षष्ठः संप्रसारणामिनि सूत्रे भाष्ये कार्यका
लं संज्ञापरिभाषं भस्येत्युपस्थितमिदं भवतीयचिभमितीत्युक्तं इक् देदिति सूत्रे भाष्ये

© Dharmartha Trust J&K. Digitized by eGangotri

यिकार्यकालं संज्ञापरिभाषं प्रगृह्यः प्रकृत्यैतदुपस्थितमिदं भवति ईदूदेद्द्विवचनं प्रगृ
ह्यमितीति निर्दिष्टेति सूत्रे कैपटोऽपि निर्दिष्टं तु के संज्ञा वाक्यं कत्वात् निर्दिष्टेति समर्थनत इत्या
हः अत्र पक्षे एकत्र शक्तिः ग्रहे हृतेऽपि तत्प्रदेशस्य स्यैव तत्रार्थे शक्तिरिति संभावनया प्रा
देशान्तरस्थेऽवबोधो न स्यादिति सर्वप्रदेशेषु तन्नत्यदशक्तिग्रहपूर्वकं विधिवाक्यार्थबो
धः यथोद्देशे तु पक्षे देवशक्तिग्रहात्सर्वत्र बोध इति विशेष इत्याहुः यत्नं तुः ख्वैनेति त
त्राख्यन्यायादित्यर्थः यत्नं तुः ख्वेन संभिन्नं न च ग्रस्तमनन्तरं अभिलाषोपनीतं च न तत्
ख्वंस्वःपदास्पदमित्यभियुक्तोक्तिः अदेङ्गुणः सवार्थ्यमिति पूर्वपरयोरुभयकारकमि
त्यर्थः न चेति चस्त्वर्थे नियमसिद्धिस्तु नेत्यर्थः पचंतीति अकारस्य गुणत्वात्पररूपम्

© Dharmartha Trust J&K. Digitized by eGangotri

नं. ७२

इकोगुणवृद्धी विशेषो नास्तीति विशेषाभावेपि पर्जन्यवल्लक्षणप्रवृत्त्या गुणः स्या
दिति भावः ॥ ८ ॥ अचिकीर्षीदिति सिचि वृद्धिरिति प्राप्ता निर्दिष्टेति आधिकसंग्राहका
त्र्यग्रहणादिति भावः सिचि वृद्धाविति सकः पूर्वं सिचि वृद्धिरित्यनेनेत्यर्थः पानेति
आकारस्यालोपाद्यर्थः स्यात् तावतापीति रूपसिद्धेरिति पुगस्तु हन्येत्यर्थः आलोप इति
न चलाक्षणिकस्वाद्यमालोप इति वाच्यं पशुष इति भाष्यप्रयोगेणालोपेनस्य परिभाषाया
अप्रवृत्तेः तद्वा येपीति अवायेनोपपत्तौ वायकल्पनमन्याय्यमिति भावः आयादेश इति ।
ऐकारस्याविकृतरूपश्रवणार्थत्वादिति भावः ज्ञात्वाविति औत्वाप्राप्तेः अत्र स्नासिष्टी
मिति एकवचने तु यलोपे सन्निपातपरिभाषया सगिटोरभावेनापि सिध्यति रूपमित्याभि



© Dharmartha Trust J&K. Digitized by eGangotri

कै० टी
आह्निक
९

अथ नवमाह्निकव्याख्यारंभः

अदर्शनं लोपः ॥ ॥ अर्थस्येति । यद्यपि स्वं रूपमिति नियमात्स्वरूपमप्यर्थस्तथापि लोके प्रसिद्धार्थस्य ग्रहणमिति सर्थः । महासंज्ञेति अर्थस्यैवेति
इत्याप्तीत्यपेयाप्यनास्तित्याद्यस्यानुजादृशमस्यास्य व्याकरणमनर्थकं न हि अदर्शनशब्दो लोपनक्रिया
विशेषलाभायेति ॥ यद्यपि छिस्तशब्दो लोके विद्यमानस्यैव विघाते प्रसिद्धस्तथापि स्वल्लोपादस्या
द्र्श्वमाणयोगेपि दृष्टप्रयोजनाद्भाविभाव्यः ॥ गुणागमेति ॥ ननु हुजीसनेन धातुमात्क्षिप्यद्यस्यात्तस्य धातोरि
तिवृत्तिकारणेद्विभिधाख्यानलात्रायं दोषइतिचेदत्र केचित् अक्षिप्तस्याशब्देन्त्वपेमानाभावः ॥
अत्र चेदमेव भाष्यमानमत्र जत्वप्रसपभ्रहणोपस्मात्संविहितइस्यनयापि नास्तिभिर्वाहः अनि
यमे नियमफलाभावास्तस्मादिहाप्रवृत्तेभिलाहुः किंच कृतितुग्ग्रहणाज्ज्ञापकात्संनिपातपरिभाषा
नित्येति भाष्यमते इष्टस्यस्यैव लुकुभ्यजे ॥ अणकार्येणेति । अणस्तस्माद्विधानाभावेन ञ्जिणोस्य
त्पयनिरूपिताङ्क्लंगास्मीजिवृद्धेनेश्राप्तिरिसपिवोध्यम् ॥ पंचम्यापत्तेरिति ॥ केचित्तु प्रसास
त्यात्स्यवत्नार्थकर्मीधिकरणापोरेवंपर्वमीविधानात्तात्रजेस्मान्निस्तत्वेषिष्ठापत्तिरिसाक्षः वा
दिलोपइत्यादिसंग्रहापाहवादिलोपइतिभासमहस्येति ॥ ज्योतिर्जनपदेत्तिसमानस्यसः वैकपो

© Dharmartha Trust J&K. Digitized by eGangotri

१

रितिव्रीहिभिर्यजेतेत्यत्र वेयते स्सादिवत्॥ अपत्यस्य लुक्॥ शाकपार्थिवादित्वान्मध्यमपदलोप इति। कश्चिल्लुसप्तमी सा सप्तम्यन्तनिर्दिष्टं सलो
कस्य लुक् विधिवद्भवति। कस्य प्रत्ययस्य लुक् अप्राप्ता प्रयुक्तिर्भिर्लभ्यत इति भावः। नचैवं वस्ति॥ पंचगुरिस नजकीतार्य्यष्ठको ध्वर्धेति लुकि गोशब्द
स्यापि लुक् तद्धिते तिलुक्प्राप्नोति गोस्त्रियोरिति समुदायानुवृत्तेरित्यर्थः॥ नचैवं गोरद्धितलुकीत्यत्र तद्धि
तलुक्प्रतिषेधः धौव्यर्थः स्यात् तथा द्वास्ताभावादेव समासान्तप्राप्नेरितिचेन्न कृते पि परत्वात् समासान्ते लुको ह्रवी
रत्वायत्ते रितिकैयटः॥ पूर्नम्मजेभ्रत्तरङ्गानयोजिः न्यायः सुपो धात्विति॥ लुग्विधायकः श्रेतरङ्गं नि मित्तवि
नाशकप्रत्ययलुग्विषयः सत्तायत्त स्सत्वे॥ नतु समानेत्कृतेतेन व्यवधानात्कथं लुक्प्राप्तिरितिचेन्नउ
नरपदावयवत्वेन व्यवधायकत्वाभावात्॥ गोरिसनुवृत्तिसामर्थ्यात्स्यादिसन्ध्ये॥ स्त्रीप्रत्ययग्रहणमेवेति॥
नन्वेवंप्रत्ययग्रहणपरिभाषया पांचेदृ हसादौ स्त्रीप्रत्ययान्तस्य लुगापत्तिरितिचेन्न निर्दिश्यमानस्यादेशा इति

ग्म॰

मायात् प्रातिपदिकास्येति॥ तत्र कंसरजिप्रातिपत्तस्यस्यकप्रसुदेश्यतासंभवतीति भावः॥ सामर्थ्या

१

च्चेति॥ विकाराद्यर्थप्रतीत्यर्थे॥ श्री त्सर्गिकस्याणप्रवलु किक र्तव्येप स्वि धि सामर्थ्यापत्तलुको: समावेशा:

स्यादिसर्थः ॥ येनानुक्ते स्त्रिनिपन्नत्वे सुक्तौ तु पत्तोऽधावे श्रौस्त्य पिकोरणस्यात् ॥ तस्माद्वैनिवार्ये लुग्ग्रहणम् ॥
सामर्थ्याद्घत्तौ तु लुकोनेनिनार्थ इति भावः ॥ स्त्रिया निविशेषेति ॥ प्रत्ययार्थस्य स्त्रीत्वे योगस्य सत्ता भार्यमित्यर्थः
अस्य हि प्रत्यय ग्रहणाय कश्चिद्रात्तर्याद्दि संबंधः स्यात् तत्र स्वपत्त्वात्सा शोभनाइत्यादौ जनपदवाचि
नोनन्तरस्य शोभनशब्दस्यापि तु लुक् स्यादिति भावः ॥ अत्रापि समाधत्ते प्रत्ययस्य लुनुवृत्ते रिति ॥ प्रातिपदिका
दिति पञ्चमी निर्दिष्टा शास्त्रस्य प्रस्यैति विषयी कल्पनरस्यर्थः ॥ आगस्त्याकौण्डिन्ययोरिति ॥ एतौ गर्गादिपर्जितौ ॥
वैषम्यादि सिद्धान्ते तु प्रत्ययस्य लुकि अव शिष्टस्य प्रत्यासंत्य माद शौ नापेका दिति ॥ लुगपादद्दिति पूर्वोक्त
नापेकादिसर्थः अपनिवृत्तमिति ॥ लुग्ग्रहणानिवृत्तौ अस्तीनां ग्रस्यात्राद्दसर्थ्ये विवक्षायामगस्त्यादे
शेवृद्धत्वाभावश्चोन स्यात् सिध्यत्ते तु अजादेर्भाग्ग्रीव्यतीपे विवक्षिते लुकोनिषेधात्तस्य नियोगशिष्टि
गस्त्यादिशोपि न भवन्तीति सिध्यमित्यर्थः ॥ नास्ति विशेष इति ॥ न चक्रुराद्दना नामपत्यानीति पुवा पत्य वि
वक्षायां पतिन्नो स्वेतिफकि क्रतेलुगलुकोरस्ति विशेषः इति चेदत्राह गोत्रे लुगचीत्यत्र गोत्राधिकार

© Dharmartha Trust J&K. Digitized by eGangotri

२

विश्लिष्टतमस्य याद्विनरवाजनादिः गार्ग्यादिभ्यो यञ्‌गस्यतेतन्नकौ रिड्यान्यायात्तत्रात्तो नास्ति विशेषः इति गोत्रेलु
गवीस त्र प्रवराध्याय प्रसिद्धमेव गोत्रे गृह्यते कुरिड्नीशब्द शिष्यत्वः कौरिड्यशब्दस्तु न प्रवराध्याये ग
घनम् इति द्वितीये मूलकाराख्यचक्षते ॥ गोत्रग्रहणमनुवर्तते इति ननु गोत्रप्रत्ययान्तस्यैवागस्त्यस्य ग्रह
